इङ्गाकारः खरह्रस्वमूर्धजः शत्रुनाशने कुशलः। द्विजदेवानुयोगप्रसक्तधीः स्त्रीजितो मतिमान्॥ सामोति (५) यः सोऽतिविरूपदेहः शशानुगामी खलु दुर्भगश्च। दाता महारम्भसमाप्तकार्यो गुणैः शशस्यैव भवेत् समानः” इत्युक्तसंहितोक्तलक्षणादिभेदपञ्चकात्।

**अन्तःपुरिक** त्रि० अन्तःपुरे नियुक्तः ठक् संज्ञापूर्व्वकविधेरनित्यत्वान्नवृद्धिः। अन्तःपुराध्यक्षे कञ्चुक्यादौ “अस्मत्प्रार्थनामन्तःपुरिकाभ्यो निवेदयेति” चण्डकौ०।

**अन्तःपुष्प** न० अन्तर्गतं पुष्पं स्त्रीरजः। द्वादशवर्षादूर्द्धमभ्यन्तरजाते स्त्रीणां रजसि। “वर्षद्वादशकादूर्द्धं यदि पुष्पं वहिर्नहि। अन्तःपुष्पं भवत्येव पनसोडुम्बरादिवत्”। इति काश्यपसंहिता।

**अन्तःप्रकृति** स्त्री अन्तर्वर्त्तिनी प्रकृतिः राज्याङ्गम्। राज्ञां सन्निकृष्टप्रकृतौ अमात्यादौ। “अन्तःप्रकृतिकोपनं हि राज्ञां महद्व्यसनमिति” नीति०। [आत्मानुसन्धानपरे।

**अन्तःप्रज्ञ** त्रि० अन्तःस्था प्रत्यक्तत्त्वविषयिणी प्रज्ञा यस्य।

**अन्तःप्रविष्ट** त्रि० अन्तःकरणे, मध्ये वा प्रविष्टः। हृदयगते, अभ्यन्तरगते च। “अन्तःप्रविष्टकर्णपल्लवप्रतिविम्बेनेति” काद०॥

**अन्तःशरीर** न० अन्तः स्थूलदेहमध्यस्थं शरीरम्। स्थूलदेहमध्यवर्त्तिनि वेदान्तमतसिद्धे सूक्ष्मशरीरे। तच्च “पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं”मित्युक्तं सप्तदशावयवं भोगसाधनं सूक्ष्ममङ्गम्। शरीरस्य मध्ये अव्ययी०। देहमध्ये इत्यर्थे अव्य०। अन्तर्देहादयोऽप्युक्तार्थयोः। अन्तरेव देहः। मनोरूपदेहे न०। [दुःखदायके।

**अन्तःशल्य** न० अन्तःकरणस्य शल्यमिव पीड़कत्वात्। मनसो

**अन्तःसंज्ञ** त्रि० अन्तः अभ्यन्तरवर्त्तिनी कथनायोग्यत्वात् अप्रकाश्या संज्ञा चेतना यस्य। वृक्षादौ। ते च मनुना दर्शिता यथा “उद्भिज्जा स्थावराः सर्व्वे वीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः। अपुष्पाः फलवन्तोये ते वनस्पतयः स्मृताः। पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः। गुच्छगुल्मं तु विविधं तथैव तृणजातय,। वीजकाण्डरुहाख्येव प्रतानाः वल्ल्य एव च। तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना। अन्तःसंज्ञाभवन्त्येते सुखदुःखसमन्विताः” इति।

**अन्तःसत्त्वा** स्त्री अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी सारो वा यस्याः यस्य वा ब०। गर्भिण्यां स्त्रियाम्। अन्तःसारे त्रि०।

**अन्तःसुख** त्रि० अन्तरात्मनि तदनुसन्धाने एव सुखं यस्य। आत्मानुसन्धानमात्रसुखे वाह्यसुखशून्ये। “योऽन्तःसुखोऽन्तराराम इति” गीता। [मदस्राविणि हस्तिनि।

**अन्तःस्वेद** पु० अन्तःस्वेदो मदस्यन्दनं मदजलं यस्य ब०।

**अन्तक** पु० अन्तयति अन्तं करोति अन्त+णिच्–ण्वुल्। मृत्यौ “व्याजेनापि कृता राजन् नो दर्शयति सान्तकमिति” नार०पु०। देहिनां स्वस्वकर्मानुसारेण विनाशनाय ईश्वरनियुक्ते यमाख्ये देवभेदे “ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः” इति रघुः। विनाशकमात्रे त्रि० “क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहमिति” वेणी०। परमेश्वरे पु० तस्य सर्वभूतानां प्रलये संहर्त्तृत्वात्तथात्वम्, “महोदधिशयोऽन्तक” इति विष्णुस०।

**अन्तकर** त्रि० अन्तं नाशं करोति कृ–ट उप०स०। नाशकारके। “अहमन्तकरो नूनं ध्वान्तस्येव दिवाकर” इति भट्टिः। स्त्रियां ङीप्।

**अन्तकरण** त्रि० अन्तं करोति नन्द्या० ल्यु। नाशकारके। “दूरतं समाहूयञ्चैव राजा राष्ट्राद्विवासयेत्। राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षितामिति” मनुः। भावे ल्युट्। नाशने न०।

**अन्तकर्म्मन्** न० अन्तस्य नाशस्य परिच्छेदस्य वा कर्म्म उत्पादनम्। नाशने। “षो अन्तकर्म्मणि इति”पा०धातु०। स्यतेर्नाशनार्थत्वात् सकर्म्मकत्वम् तेन “राघव! स्य शरैर्घोरैर्वीर रावणमाहवे” इत्यादौ वारणस्य कर्म्मता स्येति स्यतेर्लोटो मध्यमैकवचनान्तरूपम्। परिच्छेदकरणे “अवासासीच्च वैयासकीमित्यादि।

**अन्तकारिन्** त्रि० अन्तं करोति कृ–णिनि ६त०। अन्तकारके विनाशके। स्त्रियां ङीप्। ण्वुल्। अन्तकारकोऽप्युक्तार्थे त्रि०। [ब्रह्म निर्वाणमृच्छतीति” गीता।

**अन्तकाल** पु० ६त०। मृत्युकाले, “स्थित्वाऽस्यामन्तकालेऽपि

**अन्तकृत्** त्रि० अन्तं करोति कृ–क्विप् ६त०। विनाशके।

**अन्तग** त्रि० अन्तं गच्छति गम–ड उप०स०। कार्य्यान्तगामिनि, निरवशेषकार्य्यकारके, पारगामिनि, च “यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम्। शाखान्तगमथाध्वर्य्युं छन्दोगं च समाप्तिकमिति” मनुः। [गामिनि।

**अन्तचर** त्रि० अन्ते शेषावधौ चरति चर–ट। कार्य्यादिशेष-

**अन्ततस्** अव्य० अन्त+सार्वविभक्तिकस्तसि। अन्तेन अन्ते अन्तादित्याद्यर्थे। तत्र तृतीयार्थे। “वैश्योऽद्भिः प्राशिता-